योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ११६

अज्ञातलेखकः

षोडशाधिकशततमः सर्गः ११६

अनुचरा ऊचुः ।

देव पश्यात्र संग्रामलग्नसीमान्तभूभृताम् ।

कचन्ति हेतिसंघाता विसरन्ति बलानि च ।। १

हतान्हतानभिमुखान्वीरान्वीरैः सहस्रशः ।

आरोप्यारोप्य खं यान्ति पश्य पश्याङ्गनारथैः ।। २

विजिगीषोः पुनः प्राप्ते संकटे प्रकटे रणे ।

धर्म्यं विराजते युद्धं यौवने सुरतं यथा ।। ३

लोकैरनिन्दिता लक्ष्मीरारोग्यं श्रीसमन्वितम् ।

धर्म्यं युद्धं परार्थेन जीवितस्योत्तमं फलम् ।। ४

अविरोधेन धर्मस्य युद्धे संमुखमागतम् ।

योधानुरूपं यो हन्ति शूरः स्वर्ग्यः स नेतरः ।। ५

हस्तस्थितासिवरनीलसरोजदाम-

श्यामो हयोत्थघनरेणुनिशागमोऽत्र ।

आलोकय क्रमणमेष कथं करोति

प्रोन्नामहेतिभरभूषणभाजि लक्ष्म्याः ।। ६

एते कचन्ति शरशक्तिगदाभुशुण्डी-

शूलासिकुन्तपटुतोमरचक्रपूर्णाः ।

तापाः सताण्डवकचप्रचले चलेऽब्धौ

देहेन वल्गति भुवीव फणीन्द्रसंघाः ।। ७

पश्याम्बरं बलवदम्बुधराब्धिपूर्णं

पश्याम्बरं तरलतारकतारहारम् ।

पश्याम्बरं सुघनसक्तमसैकसारं

पश्याम्बरं विशदचन्द्रकरावसिक्तम् ।। ८

यत्रानेकसुरासुरास्पदघटा तारापदेशं गता

ऋक्षाणां च यदास्पदं विसरतां सर्वोन्नतानां च यत् ।

तस्मिञ्छून्यमिति प्रतीतिरधुनाप्यस्तं गता नाम्बरे

कोऽन्यो मार्जयितुं जनोऽज्ञरचितं लोकापवादं क्षमः

मेघाटोपैः प्रलयदहनैरद्रिपक्षाभिघातै-

स्तारापूरैरमरदितिजक्षुब्धसंग्रामसंघैः ।

व्योमाद्यापि प्रकृतिविकृतिं नाम नायात्यसंख्यै-

रन्तः साराशयगुणवतां लक्ष्यते नो महिम्नः ।। १०

आन्दोलयस्यविरलं गगनार्कमङ्के

नारायणं च शशिनं च तथेतराणि ।

तेजांसि भासुरतडित्प्रभृतीनि साधो

चित्रं तथापि न जहासि यदान्ध्यमन्तः ।। ११

आकाश काशसि तु यत्र शशाङ्कबिम्बं

त्वत्कीर्णकज्जलतमो मलिनोऽसितत्वम् ।

सङ्गान्न यन्नयसि तत्खलु चित्रमुच्चैः

को नाम वान्तरमलं मलिनीकरोति ।। १२

पूर्णस्यापि जगद्दोषैः सर्वदैवाविकारिणः ।

खस्य मन्ये बुधस्येव सुखं सर्वार्थशून्यता ।। १३

कल्पाभ्रद्रुमवीरुदुन्नतिदृशां कर्तासि धर्तासि च

आकाशेन्दुघनार्ककिन्नरमरुत्स्कन्धामराणामपि ।

सर्वं रम्यमसंकुलाशय समस्वच्छस्वभावस्य ते

यत्त्वेतद्दहनत्वमङ्ग तदहो मुख्याय खेदाय नः ।। १४

आकाश काशमसि निर्मलमच्छमुच्चै-

राधार उन्नततयोत्तममुत्तमानाम् ।

त्वामेत्य किंतु विरलं करकाघनोऽयं

लोकं विमर्दयति तेन परोऽसि नीचैः ।। १५

आकाश कर्षकष एव निकर्षणं ते

मन्ये चिरं समचितं न तु किंचिदन्यत् ।

शून्योऽसि यज्जलधरर्क्षविमानचन्द्र-

सूर्यानिलान्वहसि भासि न चार्थशून्यः ।।१६

अह्नि प्रकाशमसि रक्तवपुर्दिनान्ते

यामासु कृष्णमथ चाखिलवस्तुरिक्तम् ।

नित्यं न किंचिदपि सद्वहसीति मायां

न व्योम वेत्ति विदुषोऽपि विचेष्टितं ते ।।१७

अकिंचनोऽपि कार्याणि साधयत्याततताशयः ।

अन्तःशून्यमपि व्योम सर्वस्योन्नतिकारणम् ।। १८

न तृणसलिलं नैव ग्रामो न नाम च पत्तनं

न च दलभरस्निग्धच्छायस्तरुर्न च सत्प्रपा ।

तदपि गगनाध्वानं सूर्यः प्रयाति दिने दिने

विषममपि यत्प्रारब्धं तत्त्यजन्ति न सात्त्विकाः ।।१९

यामा ध्वान्तपटेन शीतलरुचिः कर्पूरपूरैः करै-

रर्कालोकनवांशुकेन दिवसस्तारौघपुष्पोत्करैः ।

द्यौरम्भोदतुषारवारिकुसुमैः सर्वर्तवो भूषय-

न्त्येते कालकलात्मनोस्त्रिभुवने व्योमाङ्गणं नाथयोः

धूमाभ्ररेणुतिमिरार्कनिशेशसंध्या

ताराविमानगरुडाद्रिसुरासुराणाम् ।

क्षोभैरपि प्रकृतिमुज्झति नान्तरिक्षं

चित्रोत्थिता स्थितिरहो नु महाशयस्य ।।२१

दिग्भित्तिबद्धमिदमूर्ध्वतलान्तरिक्ष

मुर्वीतलं घनपुराचलभूरिभाण्डम् ।

विद्याधरामरमहोरगजालकारं

लोकौघसंसरणसंघपिपीलिकाढ्यम् ।। २२

कालः क्रिया च भुवनं भवनं चिराय

नामाधितिष्ठत इवोपवनं विकासि ।

आशङ्क्यते प्रतिदिनं ननु नष्टमेव

नाद्यापि नश्यति च केयमहो नु माया ।। २३

[युगलकम् ।]

खं मन्ये पादपादीनां रोधयत्यधिकोन्नतिम् ।

अकर्तुरेव महतो महिम्नोदेति कर्तृता ।। २४

जगतां यत्र लक्षाणि न भवन्त्युद्भवन्ति च ।

तच्छून्यमुच्यते व्योम धिक्पाण्डित्यमखण्डितम ।। २५

व्योमन्येव प्रलीयन्ते व्योमतः प्रोद्भवन्ति च ।

गच्छतोन्मत्ततामेतामीश्वरान्यभिदा कृता ।। २६

आयान्ति यान्ति निपतन्ति तथोत्पतन्ति

सर्गश्रियः कणघटा इव पावकोत्थाः ।

यत्रामलं तदहमेकमनादिमध्यं

मन्ये खमेव न तु कारणमीश्वराख्यम् ।। २७

आधारमायततरं त्रिजगन्मणीना-

मङ्गे बिभर्त्यमितमन्तरशेषवस्तु ।

व्योमैव चिद्वपुरहं परमेव मन्ये

यत्रोदयास्तमयमेति जगद्भ्रमोऽयम् ।। २८

वनावनौ वनचरचारुकामिना

मनोहरद्रुमगहनेषु गीयते ।

इतो गिरेः शिरसि विलोक्यतेऽमुना
वियोगिना पथि वहता रसाकुलम् ।। २९
गीतं श्रृङ्गतरूच्चपल्लवपुटे निःश्वस्य सोत्कण्ठया
कंठाश्लिष्टगिरा वियोगहतया विद्याधराणां स्त्रिया ।
यन्नामात्र तदेष नाथ पथिकः सोच्छवासमाकर्णयन्
दोलान्दोलनयेव चञ्चलधिया नो याति नोनूच्यते ।। ३०
गायत्यद्रिशिरस्तरौ दलपुटे निःश्वस्य विद्याधरी
काकल्याऽतिलकं वियोगविधुरा बाष्पाकुलैषा पुरः ।
नाथोत्सङ्गगृहे गृहीतचिबुकं स्मेरं भवच्चुम्बनं
स्मृत्वास्वाद्य रसायनं हतसमा नीता मयैता इति ।। ३१
अस्याः प्राग्भवसत्पतिः स मुनिना शापेन वृक्षीकृतो
वर्षद्वादशकं तदेव गणयन्त्येषैव सात्र स्थिता ।
गायत्युत्कलिता तदेव दयितं तं पादपं संश्रिता
मार्गे मार्गविहारिणां वदनतो राजन्ममैतच्छ्रुतम्।।३२
पश्यैष सोऽस्मदवलोकनशान्तशापो
विद्याधरो विटपितामवमुच्य बालाम् ।
कण्ठेकरोति विटपाकृतिविप्रलम्भै-
स्तैरेव बाहुभिरलं स्फुटपुष्पहासः ।। ३३
शिखरिणां करिणां कुसुमोत्करो
विटपिषु स्फुटरोमसु राजते ।
गगनविच्युततारकलीलया
शिखरमेष तुषारसमानया ।। ३४
मीनावलीसरभसप्लुतिघट्टिताम्बु-
वीचीविलोलविरुवत्कुररीकराला ।
कावेर्यहो कुसुमशुक्लपटाऽवभाति
निःशङ्करङ्कुकुलसंकुलकूलकच्छा ।। ३५

भात्यत्र पश्य रविणा कटके सुवेल-
शैलस्य काञ्चनशिला सकलामलश्रीः ।
वेलावलोलवरुणालयवीचिभङ्ग-
पर्यस्तवाडवकृशानुकणोपमाना ।। ३६
आसन्नपीनजलदावलितालयानां
गेहोपशल्यपरिफुल्लवनद्रुमाणाम् ।
लक्ष्मीः पलाशपटलावलिताम्बराणां
घोषौकसां समवलोकय पर्वतेषु ।। ३७
उन्निद्रपुष्पपटुपाण्डुरपुष्पखण्डा
मन्दारभाण्डविशिखण्डिकरण्डकच्छाः ।
ग्रामाः प्रपातजलजालविलासवाद्या
वल्गद्द्रुहागहनगीतजना जयन्ति ।। ३८
उन्निद्रकन्दलदलान्तरलीयमान-
कूजन्मदान्धमधुपोन्मदपामराणाम् ।
मन्ये न सा भवति तुष्टिरिहामराणां
या गोकुलेषु गिरिगह्वरिणां नराणाम् ।। ३९
भृङ्गावदोलितलताकुलकाननान्त-
र्गायत्पुलिन्ददयिताननदत्तनेत्रम् ।
लीलाकुला गतघृणं गिरिगह्वरेषु
किं घ्नन्ति शत्रुमिव मुग्धमृगं किराताः ।। ४०
नानाविकासिकुसुमोत्करसारलब्ध-
वल्लीदलावलनशीतलिताध्वगाङ्गाः ।
साम्भःप्रथप्रसरणेन तरत्तरङ्गा
ग्रामा गिरीन्द्रगहनेषु जयन्ति चन्द्रम् ।। ४१
कूजन्निर्जरवारयः परिसरत्प्रोन्निद्रतालद्रुमा
हेलोल्लासितपुष्पपल्लववलद्वल्लीवितानाम्बराः ।

पर्यन्तोन्नतसाललम्बिजलदा रम्या गिरिग्रामका-

श्चन्द्राश्वत्थमितावनिं शशिपुरस्योद्यानभागा इव ।। ४२

आसन्नपीतघनघर्घरमेघनाद-

नृत्यच्छिखण्डिनवताण्डवविप्रकीर्णैः ।

ग्रामाः कलापिकुलकोमलबर्हखण्डैः

प्रोड्डीनचन्द्रकमणिप्रकरा जयन्ति ।। ४३

पार्श्वस्थचारुशशिमण्डलमण्डनेषु

विश्रान्तवारिगुरुवारिदवारणेषु ।

ग्रामेषु या गिरितटेषु विलासलक्ष्मी

राज्येषु सा विभववत्सु कुतो विरिंचेः ।।४४

स्वामोदनन्दनवनान्तरसुन्दरेषु

संतानकस्तवकहासिनिकुञ्जकेषु ।

उन्निद्रमन्द्रमधुपाकुलपारिभद्र-

सान्द्रद्रुमेष्वभिरमे गिरिगह्वरेषु ।। ४५

हरिणीरावरम्येषु हारिहारीतहारिषु ।

गिरिग्रामेषु पुष्पेषुपुरेष्विव रतिर्नृणाम् ।। ४६

स्फाटिकस्तम्भसंभाररम्यनिर्झरवारिणि ।

नृत्यन्त्येताः शिखण्डिन्यः पश्यास्मिन्ग्रामगह्वरे।।४७

शिखण्डिन्यो विलासिन्यः पुष्पभारनता लताः ।

अत्र नृत्यन्ति कुञ्जेषु रणनिर्झरपुष्करे ।। ४८

हारीतहारिहरितोपवनद्रुमासु

वापीप्रमाणरणितामलकाकलीषु ।

ग्रामस्थलीषु गिरिगह्वरगोपितासु

मन्ये मुदैष रमते स्वरसेन कामः ।। ४९

श्रीमद्वृत्तमहाशयातपहरप्रोच्चैर्गभीराकृते

भूभृन्मूर्धसु भूषणं भवसि भो भूमे रसैकास्पदम्।

एतत्तु क्षपयेन्मनांसि यदिदं मेघ त्वया वर्षता
हर्षादूषरपल्वलस्थलतरुष्वम्भोविभागक्रमः ।।५०
नित्यं स्नासि सुतीर्थवारिविसरैरुच्चैःपदस्थोऽम्बुदः
शुद्धः सन्विपिनावनौ निवससि प्रारब्धमौनव्रतः ।
रिक्तस्याप्यतिकान्तिरेव भवतः कायाश्रया लक्ष्यते
प्रोत्थायाशनिमातनोषि किमिदं तुच्छं तवाचेष्टितम्
वस्त्वस्थानगतं सर्वं शुभमप्यशुभं भवेत् ।
दुर्मेघं स्थानमासाद्य वारि त्वसिततां गतम् ।। ५२
अहो नु मेघेन जलं विमुक्त-
महो नु तोयेन विपूरिता भूः ।
अहो नु भूमौ परिपोषितश्च
जलैर्धनाढ्यैः प्रणयीव दीनः ।। ५३
नैर्घृण्यमस्थैर्यमथाशुचित्वं
रथ्याचरत्वं परिकुत्सितत्वम् ।
श्वभ्यो गृहीतं किमु नाम मूर्खै-
मूर्खेभ्य एवाथ शुना न जाने ।। ५४
गुणैः कतिपयैरेव बहुदोषोऽपि कस्यचित् ।
उपादेयो भवत्येव शौर्यसंतोषभक्तिभिः ।। ५५
उन्मत्तमत्तपतनोन्मुखधावमान-
मानाधिकान्विषयवीथिषु दत्तमूर्तिः ।
यन्मन्यते तृणलवाग्र विलोकयेच्छा-
सत्त्वं जडत्वमुत वास्य विचार्यतां तत् ।। ५६
कोलाहलः समानेऽपि तिर्यक्त्वे क्षुब्धमानसैः ।
अन्यथा सह्यते सिंहैर्मीलितैरन्यथा श्वभिः ।। ५७
नित्याशुचे प्रियजने भषणैकनिष्ठ
रथ्यान्तरभ्रमणनीतसमस्तकाल ।

कौलेयकाशयसमानतयैव मन्ये
मूर्खेण केनचिदहो बत शिक्षितोसि।।५८
नित्यं सर्वं जगदसदृशं कुर्वतोच्चैर्विधात्रा
दौहित्रेऽस्मिञ्छुनि समदृशे निर्मितं सर्वमेव ।
वासोऽमेध्यावकरकुहरे भोजनं गूथपूयं
सर्वालोके कुरतिकुरतिः सर्वनिन्द्यं शरीरम् ।। ५९
त्वत्तः कोऽधम इत्युदीरितवते श्वोवाच हासान्वितं
मत्तो मौर्ख्यममेध्यमान्ध्यमशुभं यः सेवते सोधिकः
शौर्यं भक्तिरकृत्रिमा धृतिरिति श्रीमान्गुणो योस्ति मे
मूर्खादेष गुणः प्रयत्ननिचयैरन्विष्य नो लभ्यते ।।६०
भुङ्क्तेऽमेध्यममेध्य एव रमते नित्यं महावस्करे
तूष्णीमत्ति सचेतनं कृतरतिर्निश्चेतनं कृन्तति ।
सर्वैरेत्य रते शुनीविवलिते लोष्टैर्जनैस्ताड्यते
धात्रा खेलसमन्वितस्थितिरलं लोके कृतो नेश्वरः।।
लिङ्गस्योर्ध्वं रटत्काक आत्मानं दर्शयत्ययम् ।
सर्वाधःपातकोत्तुङ्गगतं पश्यत मामिति ।। ६२
काकक कटुकल्कारव
कवलितगुणकर्दमे भ्रमन्सरसि ।
अन्तरयसि मधुपरवं
यदतो मे शिरसि फलभूतः ।। ६३
कवलयति नरकनिकरं
परिहरति मृणालिकां ध्वाङ्क्षः ।
यदतोऽस्तु मा स्मयस्ते
स्वभ्यस्तं सर्वदा स्वदते ।। ६४
विविधवनकुसुमकेसर-
धवलवपुर्हंस इव दृष्टः ।

काकः कृमिकुलकवलं

क्लिन्नमथो कवलयन् ज्ञातः ।। ६५



कोकिला Cochlea

तुल्यवर्णच्छदैः कृष्णः संगतैः किल कोकिलैः ।

केन विज्ञायते काकः स्वयं यदि न भाषते ।। ६६

अरण्यान्या मृदः स्थाणौ स्थितः काको निरीक्षते ।

चैत्याद्दशदिशश्चोरो निशि सुप्ते जने यथा ।। ६७

सरभससारसविदल-

त्पुष्करमकरन्दसुन्दरे सरसि ।

कथमिह विहरति काकः

स्फुरदवकरनिकरधूसरस्कन्धः ।। ६८

हा कष्टमिष्टवपुषि स्फुटपुण्डरीक-

कोशे कषाहननयोग्यमुखः पिशाचः ।

पश्यैष काक उपविश्य कुपल्वलेऽस्मिन्

लीलाःकरोति विविधाः सह राजहंसैः ।।६९

हे काक कर्कशरव क्रकचैकचिह्न

तादृक्स्वशङ्कनमपि क्व नु तेऽद्य यातम् ।

कस्मादनर्थकमिदं पिकपाकमेक-

पुत्राशया तदपि ते ह्युपहाससिद्धौ ।। ७०

आलोक्य पङ्कजवने सविलासवन्तं

काकं कलङ्कसदृशं भृशमारटन्तम् ।

हा कष्टशब्दशतनष्टविचेष्टितो यो

नो रोदिति क्रकचकेन विदार्यतां सः ।। ७१

विशरारुशरारुमये

वकमद्गुघने च पल्वले चपलाः ।

स्युर्यदि कौशिककाका-

स्तत्स्यादेषा समन्विता गोष्ठी ।। ७२

कोकिलः काकसंघातैः समसंवरणाकृतिः ।

गदितैर्व्यक्ततामेति सभायामिव पण्डितः ।। ७३

मृदुकुसुमाङ्कुरदलनं

सोढुमलं कोकिलस्य कुसुमलता ।

न तु कङ्कगृध्रमद्गुक-

बककुक्कुटवायसादीनाम् ।। ७४

श्रोत्रोत्सवं तव कलं कलकण्ठ कोऽत्र

नादं श्रृणोति रतिविग्रहसंधिदूतम् ।

काकैरुलूककलहैरिह गुल्मकेषु

क्रेंकारघर्घररवैः श्रुतिरागतास्तम् ।। ७५

वाचाकोमलया सुकोकिलशिशुः कल्याणकल्पां कथां

सर्वावर्जनमार्जवेन कुरुते यावत्पुरो रागिणाम् ।

तावन्मत्तनयोऽयमित्यविरतं द्रांकारभीमारवै-

र्ध्वांक्षेणोपवने निपत्य नभसः सर्वे कृता नीरसाः ७६

किं किं कोकिल कूजसि द्रुतरवं हर्षात्समुल्लासितं

ग्रीवाकोटरतः प्रवेशय पुनर्मा भूच्चिरं ते भ्रमः ।

उद्दामैः कुसुमैर्निरन्तरतरं नेदं मधोर्जृम्भितं

हेमंतेन कृतास्तुषारनिकरैः शुष्का अमी पादपाः

कूजत्कोकिल कोमलं कलरवैर्नित्यं प्रशस्ताकृते

केनेदं बत शिक्षितोसि वचनं दुःखप्रदं दुर्भगम् ।

चैत्रे चित्रनवाङ्कुरे विरहिणी वक्ति त्वया यात्मनः

कस्यायं मधुरित्यतस्तव तवेत्युक्तं त्वरोच्चैस्तरोः ।।७८

मौनस्पन्दविहारवर्णवपुषां साम्येऽपि काकव्रजेऽ-

काकः कोकिल एष कान्तिरुचिरो दूरात्परिज्ञायते

मध्ये मूर्खजनस्य पण्डित इव स्वाकारभव्यक्रियः

सर्वो हि प्रथिमानमेति सदृशस्वान्तश्चमत्कारतः ।।

भ्रातः कोकिल कूजितैरलमलं नायात्यनर्घ्यो गुण-

स्तूष्णीमास्व विशीर्णपर्णपटलच्छन्ने क्वचित्कोटरे ।

उद्दामद्रुमकन्दरे कटुरटत्काकावलीसकुलः

कालोयं शिशिरस्य संप्रति सखे नायं वसंतोत्सवः ।

चित्रं मातरमेष कोकिलशिशुः संत्यज्य काकीं गतः

सैषैनं तुदतीति यावदहमप्याचिन्तयामि क्षणम् ।

तावत्सोऽपि तथाशु मातृसदृशं श्लिष्टो रसाद्वर्धितुं

यामायाति दिशं स्वभावसुभगः सैवास्य माहा-

त्म्यदा ।। ८१

इत्यार्षे श्रीवा० बा० दे० मो० निर्वा० उ० अवि० विपश्चि० श्वकाककोकिलान्योक्तिवर्णनं नाम षोडशाधिकशततमः सर्गः ।। ११६ ।।